COMPILED AND CIRCULATED BY PROF. ASIS BHATTACHARYA
DEPARTMENT OF SANSKRIT, NARAJOLE RAJ COLLEGE

# লঘুসিদ্ধান্তকৌমুদী : বিভক্ত্যর্থাঃ প্রকরণম্

## প্রথমা বিভক্তি

১. প্রাতিপদিকার্থ –লিঙ্গ –পরিমাণ – বচনমাত্রে প্রথমা - ৮৯১(২/৩/৪৬)

(प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा )

প্রাতিপদিকার্থলিঙ্গপরিমাণবচনমাত্রেপ্রথমা ।নিয়তোপস্থিক: প্রাতিপদিকার্থ: । মাত্রশব্দস্যপ্রত্যেকং যোগ: । প্রাতিপদিকার্থমাত্রে লিঙ্গমাত্রাধিক্যে পরিমাণমাত্রে সংখ্যামাত্রে চ প্রথমা স্যাৎ । প্রাতিপদিকার্থমাত্রে- উচ্চৈ: । নীচৈ: । কৃষ্ণ: । শ্রী: । জ্ঞানম্ ।লিঙ্গমাত্রে-তট:,তটী, তটম্ । পরিমাণমাত্রে- দ্রোণোব্রীহি: । বচনং সংখ্যা । এক:, দ্বৌ,ৰহব: । ।

বঙ্গার্থ – কোন শব্দ উচ্চারিতহলে যার অবশ্যই উপস্থিতি হয় তাকে প্রাতিপদিক বলে ।প্রতিটি শব্দের সঙ্গে মাত্র শব্দটি অবশ্যই বুঝতে হবে ।অতএব প্রাতিপদিকার্থমাত্রে, লিঙ্গমাত্রাধিক্যে, পরিমাণমাত্রাধিক্যেও বচনমাত্রে প্রথমা বিভক্তি হয় । প্রাতিপদিকার্থে প্রথমার উদাহরণ - উচ্চৈ: । নীচৈ: । কৃষ্ণ: । শ্রী: । জ্ঞানম্ ।লিঙ্গমাত্রে প্রথমারউদাহরণ- তট:,তটী, তটম্ । পরিমাণমাত্রে প্রথমারউদাহরণ- দ্রোণোব্রীহি: ।বচন শব্দের অর্থ সংখ্যা । যথা-এক:, দ্বৌ,ৰহব: ।

सूत्रव्याख्या:

**व्याख्यानम्** : सूत्रमिदं वैयाकरणवरदाराजेन विरचितस्य 'लघुसिद्धान्तकौमुदी' ग्रन्थान्तर्गतस्य विभक्त्यर्थप्रकरणे उल्लिखितम्।

**शूत्रलक्षणम्** - विधिसूत्रम् ।

**समासः** - प्रातिपदिकस्य अर्थः प्रातिपदिकार्थः, षष्ठीतत्पुरुषः॥

प्रातिपदिकार्थं च, लिङ्गं च, परिमाणं च, वचनं च, प्रातिपदिकार्थलिङ्गपरिमाणवचनं, समाहारः द्वन्द्वः प्रातिकदिकार्थलिङ्गपरिमाणवचनं च अदः मात्रं च, प्राति॰वचनमात्रं, तस्मिन्, प्राति॰वचनमात्रे, कर्मधारयतत्पुरुषः, द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकम् अभिसम्बध्यते, इत्येतस्मात् नियमात् मात्रशब्दः प्रयेकम् अभिसम्बध्यते॥

**अर्थः** - प्रातिपदिकार्थः=सत्ता। लिङ्गं=स्त्रीपुंनपुंसकानि। परिमाणं=तोलनम्। वचनम्ेकः, द्वौ, बहवः। प्रातिपदिकार्थमात्रे, लिङ्गमात्रे, परिमाणमात्रे, वचनमात्रे च प्रथमा विभक्तिः भवति॥

**व्याख्यानम्** : तदेवं "ङ्याप्प्रातिपदिका"दित्यधिकृत्य विहिताः स्वादिप्रत्ययाः सप्रपञ्चं निरूपिताः। तत्र प्रथमादिसप्तम्यन्तसप्तविभक्तीनामर्थविशेषव्यवस्थां दर्शयितुमुपक्रमते-प्रातिपदिकार्थ। ननु "प्रवृत्तिनिमित्तं व्यक्तिश्चेति द्विकं प्रातिपदिकार्थः", ǝप्रवृत्तिनिमित्तं व्यक्तिर्लिङ्गं चेति त्रिकं प्रातिपदिकार्थः", प्रवृत्तिनिमित्तं व्यक्तिर्लिङ्गं संख्या चेति चतुष्कं प्रातिपदिकार्थः, प्रवृत्तिनिमित्तं व्यक्तिर्लिङ्गं सङ्ख्या कारकं चेति पञ्चकं प्रातिपदिकार्थः" इत्येते पक्षा "सरूपाणामेकशेष एकविभक्तौ" "स्त्रिया"मित्यादिसूत्रेषु भाष्ये स्थिता मञ्जूषायां प्रपञ्चिताश्च। तत्र त्रिकादिपक्षेषु लिङ्गस्यापि प्रातिपदिकार्थत्वात्पृथग्ग्रहणं व्यर्थमित्यत आह--नियतेति। नियता उपस्थितिर्यस्येति विग्रहः। यस्मिन्प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स तदर्थ इत्यर्थः। एवंच तटः तटी तटमित्याद्यनियतलिङ्गेषु नियमेन कस्यापि लिङ्गस्योपस्थित्यभावात्प्रातिपदिकार्थशब्देनाऽग्रहणात्पृथग्लिङ्गग्रहणमावश्यकमिति भावः। मात्रशब्दस्य वचनशब्देनैवान्वयभ्रमं वारयति--मात्रशब्दस्येति। प्रातिपदिकार्थश्च लिङ्गं च परिमाणं च वचनं चेति द्वन्द्वः। प्रातिपदिकार्थलिङ्गपरिमाणवचनान्येव प्रातिपदिकार्थलिङ्ग–परिमाणवचनमात्र"मित्यस्वपदविग्रहः। मात्रशब्दोऽवधारणे। "मात्रं कात्स्न्र्येऽवधारणे" इत्यमरः। "मयूरब्यंसकादयश्चेति नित्यसमासः। मात्रशब्दस्य द्वन्द्वान्ते श्रूयमाणत्वात्प्रातिपदिकार्थे, लिङ्गे, परिमाणे, वचने, च प्रत्येकमन्यवय इत्यर्थः। वचनं सङ्ख्येति वक्ष्यति। ननु प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे सङ्ख्यामात्रे च प्रथमेत्यनुपपन्नं, लिङ्गादीनां केवलानां प्रातिपदिकार्थं विना क्वाप्यनुपस्थितेरित्याशङ्क्य-"अत एव बाधकाल्लिङ्गमात्रेऽधिके इति विवक्षित"मित्यभिप्रेत्य व्याचष्टे--लिङ्गमात्राद्याधिक्ये इति। लिङ्गमात्राधिक्ये परिमाणमात्राधिक्ये चेत्यर्थः। प्रातिपदिकार्थमात्र ॼइत्यस्योदाहरति--उच्चैरित्यादि। नन्वव्ययेषु "सामान्ये नपुंसक"मिति नपुंसकत्वस्य च कृष्णशब्दे पुंस्त्वस्य च श्रीशब्दे स्त्रीत्वस्य च ज्ञानशब्दे नपुंसकत्वस्य च भानात्कथं प्रातिपदिकार्थस्योदाहरणान्येतानीत्यत आह--अलिङ्गा इत्यादि। "अव्ययादाप्सुपः" इति सूत्रे "आब्ग्रहणं व्यर्थमलिङ्गत्वा"दिति भाष्योक्तरीत्याऽव्यये कस्यापि लिङ्गस्यानुपस्थॼइतिरिति प्रातिपदिकार्थमात्रे इत्यस्य भवत्यव्ययमुदाहरणम्। कृष्णशब्दे पुंस्त्वस्य श्रीशब्दे स्त्रीत्वस्य ज्ञानशब्दे नपुंसकत्वस्य च नियमेन भानमस्ति तेषां नियतलिङ्गत्वात् अतस्तेषु लिङ्गनामपि

प्रातिपदिकार्थान्तर्भावात्तेषामपि प्रातिपदिकार्थमात्रे इत्युदाहरणत्वं निर्बाधमिति भावः। यद्यपि "कृष्णः पटः" "कृष्णा पटी" "कृष्णं वस्त्र"मित्यादौ कृष्णशब्दस्त्रिलिङ्गः, तथापि भगवत्पर एवात्र कृष्णशब्दो विवक्षित इति भावः। नच प्रातिपदिक्तोक्तार्थे किं प्रथमयेति वाच्यम्, एकत्वादिसंख्याबोधार्थत्वात्। नचाऽव्ययात्प्रथमोत्पत्तेः फलाऽभावः "अव्ययादाप्सुप" इति लुकोऽवश्यं प्रवृत्तेरिति वाच्यं, पदत्वार्थं सुबुत्पत्तेरावश्यकत्वात्। नचाऽव्ययात्प्रथमोत्पत्तेः फलाऽभावः "अव्ययादाप्सुप" इति लुकोऽवश्यं प्रवृत्तेरिति वाच्यं, पदत्वार्थं सुबुत्पत्तेरावश्यकत्वात्। तेन उच्चैरित्यादौ रुत्वविसर्गौ "उच्चैस्ते सम्यगुच्चारण"मित्यादौ तेमयादिसिद्धिश्च भवति। अनियतेति। अनियतलिङ्गास्तु तटादिशब्दा लिङ्गमात्राधिक्यस्योदाहरणम्। तत्र लिङ्गानामनियतोप–स्थितिकतया प्रातिपदिकार्थनन्तर्भावादित्यर्थः। तटः तटी तटमिति। "तटं त्रिषु" इत्यमरः। परिमाणमात्रे इति। उदाहरणं वक्ष्यते इत्यर्थः। द्रोणो व्रीहिरिति। द्रोणः परिमाणविशेषः। "जालसूर्यमरीचिस्थं त्रसरेणुरिति स्मृतम्। तेऽष्टौ लिक्षा तु तास्तिरुआओ राजसर्षप उच्यते। गौरस्तु ते त्रयः, षट् ते यवो, मध्यस्तु ते त्रयः। कृष्णलः, पञ्च ते माषः, ते सुवर्णस्तु षोडश। बलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्तितम्। पलद्वयं तु प्रसृतं, द्विगुणं कुडबं मतम्। चतुर्भिः कुडवैः प्रस्थः, प्रस्थाश्चत्वार आढकः। आढकैस्तैश्चतुर्भिस्तु द्रोण इत्यभिधीयते। कुम्भो द्रोणद्वयं शूर्पः, खारी द्रोणास्तु षोडश।क्ष्इतिस्मरणात्। ब्राईहिरिति। जातावेकवचनं "जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्" इति वचनात्। व्रीहिराशिरिति यावत्। नह्येकस्या व्रीहिव्यक्तेद्र्रोणपरिमाणं संभवति। ननु द्रोणाख्यापरिमाणविशेषस्य व्रीहिव्यक्तेश्च कथमभेदान्वयः, धर्मधर्मिणोर्भेदादित्यत आह--द्रोणरूपमिति। तथाचाऽभेदान्वयवस्य बाधादेव द्रोणपरिमाणस्य व्रीहिव्यक्तेश्च परिच्छेदकभावेनान्वयाभ्युपगमान्नोक्तदोष इति भावः।

ननु द्रोणशब्दस्य परिमाणविशेषवाचिनो नियतपुंलिङ्गत्वे प्रातिपदिकार्थमात्रे इत्येव सिद्धम्। यदि तु "अस्त्रियामाढकद्रोणौ" इति द्विलिहगता, तर्हि लिङ्गमात्राधिक्ये इत्येव सिद्धं। तत्क परिमाणग्रहणेनेति चेत्तत्राह--प्रत्ययार्थे परिमाणे इति। न हि द्रोणत्वेन रूपेम परिमाणविशेषवाचिद्रोणशब्दात्स्वार्थे प्रथमाविभक्तिरिष्यते, येन प्रातिपदिकार्थमात्रे इत्यनेन गतार्थता

स्यात्। किं तु द्रोणत्वेन परिमाणवाचिनो द्रोणशब्दात्परिमाणत्वसामान्यरूपेण द्रोणपरिमाणे विवक्षिते प्रथमा विभक्तिर्विधीयते। ततश्च प्रत्ययार्थे परिमाणसामान्ये द्रोणशब्दार्थात्भकप्रकृत्यर्थः परिमाणविशेषः सामान्यविशेषात्मकाऽभेदसंसर्गेणान्वेति। परिमाणसामान्यात्मकप्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहावन्वेति। तथाच द्रोणाक्यपरिमाणविशेषात्मकं यत्सामान्यपरिमाणं तत्परिच्छिन्नो व्रीहिरिति बोधः फलति। अन्यथा द्रोणाक्यपरिमाणविशेषपरिच्छिन्नो व्रीहिरिति बोधः स्यात्। परिमाणसामान्यात्मकप्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहावन्वेति। तथाच द्रोणाख्यपरिमाणविशेषात्मकं यत्सामान्यपरिमाणं तत्परिच्छिन्नो व्रीहिरिति बोधः फलति। अन्यथा द्रोणाख्यपरिमाणविशेषपरिच्छिन्नो व्रीहिरिति बोधः स्यात्। परिमाणसामान्यं न प्रतीयते। तदर्थमिह परिमाणग्रहणमित्यर्थः।

वचनं सङ्ख्येति। पूर्वाचार्यैस्तथा संज्ञाकरणादिति भावः। तथाच सङ्ख्यमात्रे प्रथमेति लभ्यते। नच लिङ्गमात्राधिक्ये परिमाणमात्राधिक्ये इतिवत्सहख्यामात्राधिक्ये इति कुतो न व्याख्यातमिति वाच्यं, केवललिङ्गपरिमाणयोः क्वाप्युपस्थित्यभावेन तथा व्याख्यानेऽपि एकद्विबहुशब्देष्वेकत्वद्वित्वबहुत्वानां केवलानां नियतोपस्थितिसत्त्वेन सङ्ख्यामात्रे इत्येव व्याख्यातुमुचितत्वात्। अत एव भाष्ये वचनग्रहणांशे एको द्वौ बहव इत्युदाहमतम्।ननु एको द्वौ बहव इत्यत्र एकत्वद्वित्वबहुत्वानां नियमनोपस्थित्या "प्रातिपदिकार्थे " इत्येव सिद्धे वचनग्रहणं व्यर्थमित्यत आह--इहेति। प्रकृतिभिरेवैकत्वादीनामुक्तत्वात् "उक्तार्थानामप्रयोगः" इति न्यायेन प्रथमाविभक्तेरप्राप्तौ तदर्थं वचनग्रहणमित्यर्थः। तथाच विभक्तिरिहानुवादिका शब्दसाधुत्वार्थं प्रयोज्या, ठन केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः" इत्यनभिहितसूत्रभाष्यसिद्धन्यायादिति भावः। इदमेवाभिप्रेत्योक्तं भाष्ये--"उक्तेष्वप्येकत्वादिषु प्रथमा" इति। मात्रग्रहणात्कारकाद्याधिक्ये प्रथमा न भवति। अत्र "अर्थे प्रथमे"त्येव सूत्रयितुमुचितमिति प्रौढमनोरमादौ प्रपञ्चितम्।"